Topic 88

तुदादिगण उभयपदी धातुएँ

रुधिर् आवरणे।

रुधादिभ्यः श्नम् ।

शपोऽपवादः । रुणद्धि । श्नसोरल्लोपः । रुन्ध्वः । रुन्धन्ति । रुणत्सि । रुन्ध्थः । रुन्ध । रुणद्धि । रुन्ध्वः । रुन्ध्मः । रुन्धे । रुन्धाते । रुन्धते । रुनत्से । रुन्धाथे । रुन्ध्वे । रुन्धे । रुन्ध्वहे । रुन्ध्महे । रुरोध । रुरुधे । रोद्धा । रोत्स्यति, रोत्स्यते । रुणद्धु । रुन्धात् । रुन्धाम । रुन्धन्तु । रुन्धि । रुणधानि । रुणधाव । रुणधाम । रुणधाम् । रुन्धाताम् । रुन्धताम् । रुन्त्स्व । रुणधै । रुणधाव है । रुणधाम है । अरुणत् । अरुणद् । अरुन्धाम् । अरुन्धन् । अरुणत्, अरुणः । अरुन्ध । अरुन्धाताम् । अरुन्धत । अरुन्धाः । रुन्ध्यात् । रुन्धीत । रुध्यात् । रुत्सीष्ट । अरुधत् । अरौत्सीत् । अरुद्ध । अरुत्साताम् । अरुत्सत । अरौत्स्यत् । अरौत्स्यत । भिदिर् विदारणे । छिदिर् द्वैधीकरणे । भुजिर् पालने । रिचिर् विरेचने । रिणक्ति । रिङ्क्ते । रिरेच । रेक्ता । रेक्ष्यति । अरिणक् । अरिचत् । अरेचीत् । अरिक्त । विचिर् पृथग्भावे । विनक्ति । विङ्क्ते । क्षुदिर् सम्पेषणे । क्षुणत्ति । क्षुन्ते । क्षोत्ता । अक्षुदत् । अक्षौत्सीत् । अक्षुत । उच्छृदिर् दीप्तिदेवनयोः । छृणत्ति । छृन्ते । चच्छर्द । सेऽसिचि – ० इति वेट् । चच्छृत्से । चच्छृदिषे । छर्दिता । छर्दिष्यति, छर्त्स्यति । अच्छृदत् । अच्छर्दीत् । अच्छर्दिष्ट । उतृदिर् हिंसानादरयोः । तृणत्ति । तृन्ते ।